# श्री मातङ्गीसहस्त्रनामस्तोत्रम्

## ईश्वर उवाचः

शृणु देवि प्रवक्ष्यामि साम्प्रतं तत्त्वतः परम् ।
नाम्नां सहस्त्रं परमं सुमुख्याः सिद्धयेहितम् ।।1।।
सहस्त्रनामपाठी यः सर्वत्र विजयी भवेत् ।
पराभवो न तस्यास्ति सभायां वा महारणे ।।2।।
यथा तुष्टा भवेद्देवी सुमुखी चास्य पाठतः ।
तथा भवति देवेशि साधकः शिव एव सः ।।3।।

अश्वमेधसहस्त्राणि वाजपेयस्य कोटयः ।
सकृत्पाठेन जायन्ते प्रसन्ना सुमुखी भवेत् ।।4।।
मातंगीऽस्य ऋषिश्छन्दोऽनुष्टुप् देवी समीरिता ।
सुमुखी विनियोगः स्यात् सर्वसम्पत्तिहेतवे ।।5।।
एवं ध्यात्वा पठेदेतद्यदीच्छेत्सिद्धिमात्मनः ।।6।।

## अथ ध्यानम्

देवीं षोडशवार्षिकीं शवगतां माध्वीरसाघूर्णितां,
श्यामाङ्गीमरुणाम्बरां पृथुकुचां गुञ्जावलीशीभिताम् ।
हस्ताभ्यां दधतीं कपालममलं तीक्ष्णं तथा कर्त्रिकां,
ध्यायेन्मानसपङ्कजे भगवतीमुच्छिष्टचाण्डालिनीम् ।।1।।

## सहस्त्रनामस्तोत्रम्

ॐ सुमुखी शेमुषी सेव्या सुरसा शशिशेखरा ।
समानास्या साधनी च समस्तसुरसम्मुखी ।।2।।
सर्वसम्पत्तिजननी सम्पदा सिन्धुसेविनी ।
शम्भुसोमन्तिनी सौम्या समाराध्या सुधारसा ।।3।।
सारङ्गासवलीवेला लावण्यवनमालिनी ।
वनजाक्षी वनचरी वनी वनविनोदिनी ।।4।।
वेगिनी वेगदा वेगा बगलस्था बलाधिका ।
काली कालप्रिया केली कामला कालकामिनी ।।5।।
कमला कमलस्था च कमलस्था कलावती ।
कुलीना कुटिला कान्ता कोकिला कलभाषिणी ।।6।।
कीरा केलिकरा काली कपालिन्यपि कालिका ।
केशिनी च कशावर्ता कौशाम्भी केशवप्रिया ।।7।।
काली काशी महाकालसङ्काशा केशदायिनी ।
कुण्डला च कुलस्था च कुण्डलाङ्गदमण्डिता ।।8।।
कुण्डपद्मा कुमुदिनी कुमुदप्रीतिवर्द्धिनी ।
कुण्डप्रिया कुण्डरुचिः कुरङ्गनयनाकुला ।।9।।

कुन्दबिम्बालिनदिनों कुसुम्भकुसुमाकरा ।
काञ्चीकनकशोभाढ्या क्वर्णात्ककिंकिणिकाकटिः ॥10॥
कठोरकरणा काष्ठा कौमुदी कण्डवत्यपि ।
कपर्द्दिनी कपटिनी कठिनी कलकण्डिनी ॥11॥
कीरहस्ता कुमारी च कुरुढकुसुमप्रिया ।
कुञ्जरस्था कुञ्जरता कुम्भी कुम्भस्तनी कला ॥12॥
कुम्भिकाङ्गा करभोरुः कदलीकुशशायिनी ।
कुपिता कोटरस्था च कङ्काली कन्दलालया ॥13॥
कपालवासिनी केशी कम्पमान शिरोरुहा ।
कादम्बरी कदम्बस्था कुङ्कुमप्रेमधारिणी ॥14॥
कुटुम्बिनी कृपायुक्ता क्रतुः क्रतुकरप्रिया ।
कात्यायनी कृत्तिका च कार्तिकी कुशवर्तिनी ॥15॥
कामपत्नी कामदात्री कामेशी कामवन्दिता ।
कामरूपा कामरतिः कामाख्या ज्ञानमोहिनी ॥16॥
खङ्गिनी खेचरी खञ्जा खञ्जरीटेक्षणा खगा ।
खरगा खरनादा च खरस्था खेलनप्रिया ॥17॥
खरांशुः खेलिनी खट्वा खरा खट्वाङ्गधारिणी ।
खरखण्डिन्यपि ख्यातिः खण्डिता खण्डनप्रिया ॥18॥
खण्डप्रिया खण्डखाद्या खण्डसिन्धुश्च खण्डिनी ।
गङ्गा गोदावरी गौरी गौतम्यपि च गोमती ॥19॥
गंगा गया गगनगा गारुडी गरुडध्वजा ।
गीता गीतप्रया गेया गुणप्रीतिर्गुरुर्गिरी ॥20॥
गोर्गौरी गण्डसदना गोकुला गोप्रतारिणी ।
गोप्ता गोविन्दिनी गूढा यूटविग्रस्तगुञ्जिनी ॥21॥
गजगा गोपिनी गोपी गोक्षा जयप्रिया गणा ।
गिरिभूपालदुहिता गोगा गोकुलवासिनी ॥22॥
घनस्तनी घनरुचिघनोरुर्घननिस्स्वना ।
घुङ्कारिणी घुक्षकरी घूघूकपरिवारिता ॥23॥
घण्टानादप्रिया घण्टा घोटा घोटकवाहिनी ।
घोररूपा च घोरा च घृतप्रीतिर्घृताञ्जनी ॥24॥
घृताची घृतवृष्टिश्च घण्टाघटघटावृता ।
घटस्था घटना घांतकरी घातनिवारिणी ॥25॥
चञ्चरीकी चकोरी चचामुण्डा चीरधारिणी ।
चातुरी चपला चञ्चुश्चिता चिन्तामणिस्थिता ॥26॥
चातुर्वर्ण्यमयी चञ्चुश्चोराचार्या चमत्कृतिः ।
चक्रवर्तिवधूश्चित्रा चक्रांशी चक्रमोदिनी ॥27॥
चेतश्वरी चित्तवृत्तिश्चेतना चेतनप्रिया ।
चापिनी चम्पकप्रीतिश्चण्डा चण्डालवासिनी ॥28॥
चिरञ्जीविनी तच्चित्ता चिञ्चामूलनिवासिनी ।
छुरिका छत्रमध्यस्थां छिन्दा छिन्द करी छिदा ॥29॥
छुच्छुन्दरी छलप्रीतिश्छुच्छन्दरिनिभस्वना ।
छलिनी छत्रदा छिन्ना दिण्टिच्छेदकरी छटा ॥30॥
छद्मिनी छान्दसी छाया छरुच्छन्दकरीत्यपि ।
जयदाजयदा जाती जायिनी जामला जतुः ॥31॥
जम्बूप्रिया जीवनस्था जङ्गमा जङ्गमप्रिया ।
जपापुष्पाप्रिया जप्या जगज्जीवा जगज्जनिः ॥32॥
जगज्जन्तुप्रधाना च जगज्जीवपरा जवा ।
जातिप्रिया जीवनस्था जीमूतसदृशीरुचिः ॥33॥
जन्या जपहिता जाया जन्मभूर्ज्जम्भसी जभूः ॥34॥
जयदा जगदावासा जायिनी ज्वरकृच्छ्रजित् ।
जपा च जपती जप्या जपार्हा जायिनी जना ॥35॥
जालन्धरमयी जानुर्जालौका जाप्यभूषणा ।
जगज्जीवमयी जीवा जरत्कारुर्जनप्रिया ॥36॥
जगतीजननिरता जगच्छोभाकरी जवा ।
जगतीत्राणकृज्जङ्घा जातीफलविनोदिनी ॥37॥
जातीपुष्पप्रिया ज्वाला जातिहा जातिरूपिणी ।
जीमूतवाहनरुचिर्जीमूता जीर्णवस्त्रकृत् ॥38॥
जीर्णवस्त्रधरा जीर्णा ज्वलती जालनाशिनी ।
जगत्क्षोभकरी जातिर्जगत्क्षोभविनाशिनी ॥39॥
जनापवादा जीवा च जननी गृहवासिनी ।
जनानुरागा जानुस्था जलवासा जलार्तिकृत् ॥40॥
जलजा जलवेला च जलचक्रनिवासिनी ।
जलमुक्ता जलारोहा जलजा जलजेक्षणा ॥41॥
जलप्रिया जलौका च जलशोभावती तथा ।
जलविस्फूर्जितवपुर्ज्वलत्पावकशोभिनी ॥42॥
झिञ्झा झिल्लमयी झिञ्झाझणत्कारकरी जया ।
झंझी झंपकरी झंपा झंपत्रासनिवारिणी ॥43॥
टङ्कारस्था टंककरी टंकारकरणांहसा ।
टंकारोट्टकृतष्ठीवा डिण्डीरवसनावृता ॥44॥
डाकिनी डामरी चैव डिण्डमध्वनिनादिनी ।
डकारनिस्स्व नरुचिस्तपिनी तापिनी तथा ॥45॥
तरुणी तुन्दिला तुन्दा तामसी च तमः प्रिया ।
ताम्रा ताम्रवती तन्तुस्तुन्दिलातुलसंभवा ॥46॥
तुलाकोटिसुवेगा च तुल्यकामा तुलाश्रया ।
तुदनी तुननी तुम्बा तुल्यकाला तुलाश्रवा ॥47॥
तुमुला तुलजा तुल्या तुलादानकरी तथा ।
तुल्यवेगा तुल्यगतिस्तुलाकोटिनिनादिनी ॥48॥
ताम्रौष्ठा ताम्रपर्णी च तमः संक्षोभकारिणी ।
त्वरिता ज्वरहा तीरा तारकेशीं तमालिनी ॥49॥
तमोदानवती तामतालस्थानवती तमी ।
तामसी च तमिस्त्रा च तीव्रा तीव्रपराक्रमा ॥50॥
तटस्था तिलतैलाक्ता तरुणी तपनद्युतिः ।
तिलोत्तमा च तिलकृत्तारकाधीशशेखरा ॥51॥
तिलपुष्पप्रिया तारा तारकेशी कुटुम्बिनी ।
स्थाणुपत्नी स्थरकरी स्थूलसम्पद्विवर्द्धिनी ॥52॥
स्थितिः स्थैर्यस्थविष्ठा च स्थपतिः स्थूलविग्रहा ।
स्थूलस्थलवती स्थाली स्थलसंग विवर्द्धिनी ॥53॥
दण्डिनी दन्तिनी दामा दरिद्रा दीनवत्सला ।
देवी देववधूर्दित्या दामिनी देवभूषणा ।
दयादमवती दीनवत्सला दाडिमस्तनी ॥54॥
देवमूर्तिकरा दैत्या दारिणी देवतानता ।
दोलाक्रीडा दयालुश्च दम्पती देवतामयी ।
दशादीपस्थिता दोषा दोषहा दोषकारिणी ॥55॥
दुर्गा दुर्गार्तिशमनी दुर्गम्या दुर्गवासिनी ।
दुर्गन्धनाशिनी दुःस्था दुःखप्रशमकारिणी ॥56॥
दुर्गन्धा दुन्दुभिध्वान्ता दूरस्था दूरवासिनी ।
वरदा वरदात्री च दुर्व्याधदयिता दमी ॥57॥
धुरन्धरा धुरीणा च धौरेयी धनदायिनी ।
धीरारवा धरित्रो च धर्मदा धीरमानसा ॥58॥
धनुर्द्धरा च धमनी धमनीधूर्तविग्रहा ।
धूम्रवर्णा धूमला धूम्राशा धूममोदिनी ॥59॥
नन्दिनी नन्दिनी नन्दा नन्दिनी नन्दबालिका ।
नवीना नर्मदा नर्मनेमिर्नियमनिस्सवना ॥60॥
निर्मला निगमाधारा निम्नगा नग्नकामिनी ।

नीला निरत्ना निर्वाण निर्लोभा निर्गुणा नतिः ।।61।।
नीलग्रीवा निरीहा च निरञ्जनजनानवा ।
निर्गुण्डिा च निर्गुण्डा निर्नासा नासिकाभिधा ।।62।।
पताकिनी पताका च पत्रप्रीतिः पयस्विनी ।
पीनानी-नस्तनी पत्नी पवनाशा निशामयी ।।63।।
परा परपरा काली पारकृत्यभुजाप्रिया ।
पवनस्था च पवना पवनप्रीतिवर्द्धिनी ।।64।।
पशुवृद्धिकरी पुष्पपोषिका पुष्टिवर्द्धिनी ।
पुष्पिणी पुस्तककरा पूर्णिमाऽतलवासिनी ।।65।।
पेशी पाशकरी पाशा पांशुहा पांशुला पशुः ।
पटुः पराशा परशुधारिणी पाशिनी तथा ।।66।।
पापघ्नी पतिपत्नी च पतिता पतितापनी ।
पिशाची च पिशाचेशी पिशिताशनतोषिणी ।।67।।
पानदा पानपात्री च पानदानकरोद्यता ।
पेया प्रसिद्धा पीयूषा पूर्णा पूर्णमनोरथा ।।68।।
पतंगाभा पतंगा च पौनःपुन्यमिवापरा ।
पङ्किला पङ्कमग्ना च पानीया पञ्जरस्थिता ।।69।।
पञ्चमी पञ्चयज्ञा च पञ्चता पञ्चमप्रिया ।
पिचुमन्दा पुण्डरीका पिकी पिङ्गललोचना ।।70।।
प्रियंगुमञ्जरी पिण्डीः पण्डिता पाण्डुरप्रभा ।
प्रेतासना पियालस्था पाण्डुघ्नी पीनसापहा ।।71।।
फलिनी फलदात्री च फलश्रीः फलभूषणा ।
फूत्कारकारिणी स्फारी फुल्ला फुल्लाम्बुजानना ।।72।।
स्फुलिङ्गहा स्फीतमतिः स्फीत कीर्तिकरी तथा ।
बलमाया बलारातिर्बलिनी बलबर्द्धिनी ।।73।।
वेणुवाद्या वनचरी विरञ्चिजनयित्र्यपि ।
विद्याप्रदा महाविद्या बोधिनी बोधदायिनी ।।74।।
बुद्धमाता च बुद्धा च बनमालावती वरा ।
वरदा वारुणी वीणा वीणावादनतत्परा ।।75।।
विनोदिनी विनोदस्या वैष्णवी विष्णुवल्लभा ।
वैद्या वैद्यचिकित्सा च विवशा विश्व विश्रुता ।।76।।
विद्यौघविह्वला वेला वित्तदा विगतज्वरा ।
विरावा विवरीकारा बिम्बोष्ठो बिम्बवत्सला ।।77।।
विन्ध्यस्था वरवन्द्या च वीरस्थानवरा च वित् ।
वेदान्तवेद्या विजया विजयी र्विजयप्रदा ।।78।।
विरोगिवन्दिनी वन्ध्या वन्द्यवन्धनिवारिणी ।
भगिनी भगमाला च भावनी भवनाशिनी ।।79।।
भीमा भीमानना भीमा भंगुरा भीमदर्शना ।
भिल्ली भिल्लधरा भोरुर्भरुण्डा भीर्भयावहा ।।80।।
भगसर्पिण्यपि भगा भगरूपा भगालया ।
भगासना भगाभोगा भेरीझङ्काररञ्जिता ।।81।।
भीषणा भीषणारावाभगवत्यहिभूषणा ।
भारद्वाजा भोगदात्री भूतिघ्नी भूतिभूषणा ।।82।।
भूमिदा भूमिदात्री च भूपतिर्वरदायिनी ।
भ्रमरी भ्रामरी भाला भूपालकुलसंस्थिता ।।83।।
माता मनोहरा माया मानिनी मोहिनी मही ।
महालक्ष्मीर्मदक्षीबा मदिरा मदिरालया ।।84।।
मदोद्धता मतङ्गस्था माधवी मधुमर्द्दिनी ।
मोदा मोदकरी मेधा मेध्या मध्याधिपस्थिता ।।85।।
मद्यपा मांसलोमस्था मोदिनी मैथुनोद्यता ।
मूर्द्धाबती महामाया मायामहिममन्दिरा ।।86।।
महामाला महाविद्या महामारी महेश्वरी ।
महादेववधूर्मान्या मथुरा मेरुमण्डिता ।।87।।
मेदस्विनी मिलिन्दाक्षी महिषासुरमर्द्दिनी ।
मण्डस्था च मगस्था च मदिरारागगर्विता ।।88।।
मोक्षदा मुण्डमाला च माला मालाविलासिनी ।
मातंगिनी च मातंगी मातंगतनयापि च ।।89।।
मधुस्त्रवा मधुरता बन्धूककुसुमप्रिया ।
यामिनी यामिनीनाथभूषा यावकरञ्जिता ।।90।।
यवांकुरप्रिया यामा यवनी यवनार्द्दिनी ।
यमघ्नी यमकल्पा च यजमानस्वरूपिणी ।।91।।
यज्ञा यज्ञयजुर्यक्षी यशोनिष्कम्पकारिणी ।
यक्षिणी यक्षजननी यशोदायासधारिणी ।।92।।
यशस्सूत्रप्रदायामा यज्ञकर्मकरीत्यपि ।
यशस्विनी यकारस्था यूपस्तम्भनिवासिनी ।।93।।
रञ्जिता राजपत्नी च रमा रेखा रवीरणा ।
रजोवती रजश्चित्रा रञ्जनी रजनीपतिः ।।94।।
रोगिणी रजनी राज्ञो राज्यदा राज्यवर्द्धिनी ।
राजन्वती राजनीतिस्तथा रजतवासिनी ।।95।।
रमणी रमणीया च रामा रामावती रतिः ।
रेतोरती रतोत्साहा रोगघ्नी रोगकारिणी ।।96।।
रंगा रंगवती रागा रागज्ञा रागकृद्दया ।
रामिका रजकी रेवा रजनी रंगलोचना ।।97।।
रक्तचर्मधरा रंगी रंगस्था रंगवाहिनी ।
रमा रम्भाफलप्रीति रम्भोरू राघवप्रिया ।।98।।
रंगा रंगागंमधुरा रोदसी च महारवा ।
रोगकृद्रोगहन्त्री च रोगभृद्रोगस्त्राविणी ।।99।।
बन्दी बन्दिस्तुता बन्धुर्बन्धूककुसुमाधरा ।
वन्दिता वन्द्यमाना चे वैद्रावी वेदविद्विधा ।।100।।
विकोपा विकपाला च विकस्था विङ्कवत्सला ।
वेदिर्विलग्नलग्ना च विधिविङ्ककरी विधा ।।101।।
शङ्खिनी शङ्खवलया शङ्खमालावती शमी ।
शङ्खपात्राशिनी शङ्खस्वना शङ्खगला शशी ।।102।।
शबरी शाम्बरी शम्भुः शुम्भकेशा शरासिनी ।
शवा श्येनवती श्यामा श्यामाङ्गी श्यामलोचना ।।103।।
श्मशानस्थाश्मशाना च श्मशानस्थानभूषणा ।
शमदा शमहन्त्री च शङ्खिनी शङ्खरोषणा ।।104।।
शान्तिः शान्तिप्रदा शेषा शेषाख्या शेषशायिनी ।
शेमुषीशोषिणी शेषा शौर्या शौर्यशरा शरी ।।105।।
शापदा शापहा शापा शापपन्था सदाशिवा ।
भृङ्गिणी भृङ्गिपलभुक् शङ्करी शाङ्करी शिवा ।।106।।
शवस्था शवभुक् शान्ता शवकर्णा शवोदरी ।
शाविनी शवशिन्शा श्रीः शवा च शवशायिनी ।।107।।
शवकुण्डलिनी शैवा शीकरा शिशिराशना ।
शवकाञ्ची शवश्रीका शवमाला शवाकृतिः ।।108।।
स्त्रवन्ती संकुचा शक्तिशन्तनुश्श्वदायिनी ।
सिन्धुः सरस्वती सिन्धुस्सुन्दरी सुन्दरानना ।।109।।
साधुः सिद्धिप्रदात्री च सिद्धा सिद्धसरस्वती ।
सन्ततिस्सम्पदासम्विच्छाङ्किसम्पत्तिदायिनी ।।110।।
सपत्नी सरसा सारा सारस्वतकरी सुधा ।
सुरा समांसाशना च समाराध्या समस्तदा ।।111।।
समधीस्सामदा सीमा सम्महोहा समदर्शना ।
सामतिस्सामदा सीमा सावित्री सविधा सती ।।11
सवना सवनासारा सवरा सावरा समी ।

सिमरा सतता साध्वी सध्रीची ससहायिनी ।।113।।
हंसी हंसगतिर्हंसी हंसोज्ज्वलनिचोलयुक् ।
हलिनी हालिनी हाला हलश्रीर्हरवल्लभा ।।114।।
हला हलवती ह्वीषा हेला हर्षविवर्द्धिनी ।
हंतिर्हंता हया हाहाहताऽहंतातिकारिणी ।।115।।
हङ्कारी हंकृतिर्हङ्का हीहीहाहाहिता हिता ।
हीतिर्हेमप्रदा हारा राविणी हरिसम्मता ।।116।।
होरा होत्री होलिका च होमा होमहर्विर्हविः ।
हरिणी हरिणीनेत्रा हिमाचलनिवासिनी ।।117।।
लम्बोदरी लम्बकर्णा लम्बिका लम्बविग्रहा ।
लीला लीलावती लोला ललना ललिता लता ।।118।।
ललामलोचना लोम्या लोलाक्षी सत्कुलालया ।
लपत्नी लपती लम्या लोपामुद्रा ललन्तिका ।।119।।
लतिका लङ्घिनी लङ्घा लालिमा लघुमध्यमा ।
लघीयसी लघूदर्या लूता लूताविनाशिनी ।।120।।
लोमशा लोमलम्बी च लुलन्ती च लुलुम्पती ।
लुलायस्था बलहरी लङ्कापुरपुरन्दरा ।।121।।
लक्ष्मीर्लक्ष्मीप्रदाऽलभ्या लाक्षाक्षी लूलितप्रभा ।
क्षणाक्षणक्षुक्षुक्षीणा क्षमा क्षान्तिः क्षमावती ।।122।।
क्षमा क्षामोदरी क्षेम्या क्षोभभृत्क्षत्रियाङ्गना ।
क्षया क्षयकरी क्षीरा क्षीरदा श्रीसागरा ।।123।।
क्षेमङ्करी क्षयकरी क्षयकृत्क्षयदा क्षतिः ।
क्षुद्रिका क्षुद्रिकी क्षुद्रा क्षुत्क्षामा क्षीणपातका ।।124।।
मातुः सहस्त्रनामेदं सुमुख्याः सिद्धिदायकम् ।
यः पठेत्प्रयतो नित्यं स एव स्यान्महेश्वरः ।।125।।
अनाचारात्पेन्नित्यं रोगी नीरोगतो ब्रजेत् ।
मूकः स्याद्वाक्पतिर्देवि रोगो नीरोगतो ब्रजेत् ।।126।।
पुत्रार्थी पुत्रमाप्नोति त्रिषु लोकेषु विश्रुतम् ।
वन्ध्यापि सूते सत्पुत्रं विदुषस्सहशं गुरोः ।।127।।
सत्यं च बहुधा भूयादूगावश्च बहुदुरधदा ।
राजानः पादनम्रा स्युस्तस्य हासा इव स्फुटाः ।।128।।
अरयस्संक्षयं यान्ति मनसा संस्मृता अपि ।
दर्शनादेव जायन्ते नरा नार्योपि तद्वशाः ।।129।।
कर्ता हर्ता स्वयंवीरो जायते नात्र संशयः ।
ययं कामयते कामं ततं प्राप्नोति निश्चितम् ।।130।।
दुरितं न च तस्यास्ति नास्ति शोकः कथंचन ।
चतुष्पथेऽर्द्धरात्रे च यः पठेत्साधकोत्तमः ।।131।।
एकाकी निर्भयो वीरो दशवारं स्तवोत्तमम् ।
मनसा चिन्तितं कार्यं तस्य सिद्धयत्र संशयः ।।132।।
विना सहस्त्रनाम्नां यो जपेन्मन्त्रं कदाचन ।
न सिद्धिर्जायते तस्य कल्पकोटिशतैरपि ।।133।।
कुजवारे श्मशाने वा मध्याह्ने यो जपेत्सदा ।
कृतकृत्यस्य जायेत कर्ता हर्ता नृणामिह ।।134।।
रोगार्तोनिशायां यः पठेदासनसंस्थितः ।
सद्यो नीरोगतामेति यदि स्यान्निर्भयस्तदा ।।135।।
अर्द्ध रात्रे श्मशाने वा शनिवारे जपेन्मनुम् ।
अष्टोत्तरसहस्त्रं तु दशवारं जपेत्ततः ।।136।।
सहस्त्रनाम चैतद्धि तदा याति स्वयं शिवा ।
महापवनरूपेण घोरगोमायुनादिनी ।।137।।
ततो यदि न भीतिः स्यात्तदा देहीति वाग्भवेत् ।
तदा पशुबलिं दद्यात्स्वयं गृह्णाति चण्डिका चण्डिका ।।138।।
यथेष्टं च वरं दत्त्वा प्रयाति सुमुखी शिवा ।
राचनागुरुकस्तूराकपूरश्च सचन्दनः ।।139।।
कुंकुमेन दिने श्रेष्ठे लिखित्वा भूर्जपत्रके ।
शुभनक्षत्रयोगे च कृतमारुतसत्क्रियः ।।140।।
कृत्वा सम्पातनविधिं धारयेद्दक्षिणो करे ।
सहस्त्रनाम स्वर्णस्थ कण्ठे वा विजितेन्द्रियः ।।141।।
तदा यं प्रणमेन्मन्त्री क्रुद्धस्य म्रियते नरः ।
दुष्टश्वापदजन्तूनां न भीः कुत्रापि जायते ।।142।।
बालकानामियं रक्षा गर्भिणीनामपि प्रिये ।
मोहनस्तम्भनाकर्षमारणोच्चाटनानि च ।।143।।
यन्त्रधारणतो नूनं जायन्ते साधकस्य तु ।
नीलवस्त्रेविलिख्यैतत्तध्वजे स्थापयेद्यदि ।।144।।
तदा नष्टा भवत्येव प्रचण्डाप्यरिवाहिनी ।
एतज्जप्तं महाभस्म ललाटे यदि धारयेत् ।।145।।
तद्विलोकन एव स्युः प्राणिनस्तस्य किंकराः ।
राजपत्न्योपि विवशाः किमन्याः पुरयोषितः ।।146।।
एतज्जप्तं पिबेत्तोयं मासेन स्यान्महाकविः ।
पण्डितश्च महावादी जायते नात्र संशयः ।।147।।
अयुतं च पठेत्स्तोत्र पुरश्चरणसिद्धये ।
दशांशं कमलैर्हुत्वा त्रिमध्वाक्तैर्विधानतः ।।148।।

स्वयमायाति कमला वाण्या सह तदालये ।
मन्त्रो निःकीलतामेति सुमुखी सुमुखी भवेत् ।।149।।
अनन्तं च भवेत्पुण्यमपुण्यं च क्षयं ब्रजेत् ।
पुष्करादिषु तीर्थेषु स्नानतो यत्फलं भवेत् ।।150।।
तत्फलं लभते जन्तुः सुमुख्याः स्तोत्रपाठतः ।
एतदुक्तं रहस्यं ते स्वसर्वस्वं वरानने ।।151।।
न प्रकाश्यं त्वया देवि यदि सिद्धिं त्वमिच्छसि ।
प्रकाशनादसिद्धिस्स्सात्कुपिता सुमुखी भवेत् ।।152।।
नातः परतरं लोके सिद्धिदं प्राणिनामिह ।।153।।
वन्दे श्रीसुमुखीं प्रसन्नवदनां पूर्णेन्दुबिम्बाननां,
सिन्दूराङ्कितमस्तकां मधुमदोल्लोलोच्चमुक्तावलीम् ।
श्यामां कज्जलिकाकरां करगतं चाध्यापयन्तीं शुकं,
गुञ्जापुञ्जाविभूषणां सकरुणामामुक्तवेणीलताम् ।
गुञ्जापुञ्जविभूषणां सकरुणामामुक्तवेणीलताम् ।।154।।

।। इति श्रीनन्द्यावर्ततन्त्रे उत्तरखण्डे मातङ्गीसहस्त्रनाम स्तोत्रं सम्पूर्णम् ।।

इति हिमालयस्य तपस्विनो कायाकल्पी सन्त ब्रह्मलीन योगाधिराजः ब्रह्मर्षि बर्फानी दादाजी महाराज
स्नेहकृपाभाजन शिष्यवरः एवं गोरखपुर मण्डलार्गत त्रिफला ग्रामादागतः सरयूद्विजः कश्यप
गोत्रीय पंक्ति पावन त्रिफला पाण्डेय श्रीगौर्मुखऋषिवर्यस्यवंशजः गौरहा-उपाधिपद-
विभूषितः बिलासपुर छत्तीसगढ राज्यान्तर्गतः ग्राम सकरी निवासिनो
धर्मभूषण पण्डित श्रीधर गौरहा नामधेयेन
सङ्कलितःसम्पादितश्च महाविद्या रत्नाकरः
मातङ्गी महाविद्या एकादश पटलः सम्पूर्णम् ।

* * *